National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(69): 18-23
© 2026 NJHSR
www.sanskritarticle.com

मुकुल शर्मा
शोधार्थी,
केंद्रीय संस्कृत विश्वविद्यालय,
नई दिल्ली

शोध निर्देशिका
डॉ अमृता कौर
सहायकाचार्या ,
केंद्रीय संस्कृत विश्वविद्यालय,
नई दिल्ली

Correspondence:
मुकुल शर्मा
शोधार्थी,
केंद्रीय संस्कृत विश्वविद्यालय,
नई दिल्ली

आधुनिकसंस्कृतबालसाहित्ये प्रौद्योगिकीसिद्धान्तः- एको विमर्शः

मुकुल शर्मा, डॉ अमृता कौर

शोधसारांशः- मानवजीवनस्य आधुनिके ज्ञानविज्ञानप्रधानयुगे प्रौद्योगिक्याः प्रभावः प्रायः सर्वेषु क्षेत्रेषु दृश्यते। शिक्षाक्षेत्रं, सञ्चारव्यवस्था, मनोरञ्जनम्, साहित्यसर्जनम्, पठनपाठनपद्धतिश्च प्रौद्योगिक्याः प्रभावेन निरन्तरं परिवर्तमानाः सन्ति। बालसाहित्यं तु विशेषतः एतादृशं क्षेत्रमस्ति, यत्र बालकस्य जिज्ञासा, कल्पनाशक्तिः, क्रीडाप्रवृत्तिः, दृश्यश्रव्यबोधशक्तिः, भाषिकविकासः सामाजिकमूल्यबोधश्च सम्यक् समन्वेतव्याः भवन्ति। अतः आधुनिकसंस्कृतबालसाहित्यस्य विकासे प्रौद्योगिक्याः भूमिका अत्यन्तं महत्त्वपूर्णा भवति। संस्कृतभाषा प्राचीनज्ञानपरम्परायाः समृद्धं साधनं विद्यते। वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, पञ्चतन्त्रम्, हितोपदेशः, कथासरित्सागरश्चेत्यादिषु बालानां बौद्धिक-नैतिक-सामाजिकविकासाय बहवः तत्त्वानि निहितानि सन्ति। किन्तु आधुनिकबालकस्य पठनरुचिः, जीवनपरिस्थितिः, सञ्चारसाधनानि ज्ञानग्रहणप्रक्रिया च पूर्वापेक्षया भिन्ना जाता। अतः संस्कृतबालसाहित्यस्य आधुनिकरूपान्तरे प्रौद्योगिकीसाधनानां युक्तियुक्तः प्रयोगः अपेक्षितो वर्तते। प्रौद्योगिकीसिद्धान्तः इत्यस्यार्थः केवलं यन्त्राणां प्रयोगो न, अपि तु बालसाहित्यस्य सृजनं, प्रस्तुतीकरणं, वितरणं, पठनम्, श्रवणम्, दृश्यीकरणम्, अन्तःक्रियाशीलतां, वैयक्तिकीकरणम् मूल्याङ्कनञ्च प्रौद्योगिक्याधारितं कृत्वा बालकेन्द्रितसाहित्यव्यवस्थायाः निर्माणमिति स्वीक्रियते। ई-पुस्तकानि, श्रव्यपुस्तकानि, डिजिटलचित्रकथा, एनीमेशन, चलदूरभाषानुप्रयोगाः, गेमिफिकेशन, कृत्रिमबुद्धिमत्ता, डिजिटल-संग्रहालयाः बहुमाध्यमीयसामग्री च आधुनिकसंस्कृतबालसाहित्यस्य नूतनदिशां निर्मातुं समर्थाः सन्ति। परन्तु प्रौद्योगिकी प्रयोगः सर्वथा निर्विघ्नो नास्ति। अतिप्रयोगः, ध्यानविक्षेपः, भाषिकसरलीकरणस्य नाम्ना भाषाविकृतिः, सांस्कृतिकमूल्यानां क्षयः, कृत्रिमबुद्धेः अशुद्धिः, गोपनीयतासम्बन्धिसमस्या मानवीय-सृजनशीलतायाश्च अवमूल्यनमित्यादयः प्रश्नाः अपि विचारणीयाः सन्ति। अतः आधुनिकसंस्कृतबालसाहित्ये प्रौद्योगिकी परम्परायाः विकल्पं न भूत्वा परम्परा-आधुनिकतयोः समन्वयस्य साधनं भवति।

मुख्यशब्दाः— आधुनिकसंस्कृतबालसाहित्यम्, प्रौद्योगिकी, डिजिटलसाहित्यं, ई-पुस्तकम्, एनीमेशन, कृत्रिमबुद्धिमत्ता, गेमिफिकेशन, बालमनोविज्ञानम्, भाषाशिक्षणम्, संस्कृतशिक्षणम्।

प्रस्तावना- वस्तुतः बालकाः राष्ट्रस्य देशस्य वा भविष्यभूताः भवन्ति। बालकस्य व्यक्तित्वनिर्माणं केवलं विद्यालयीयशिक्षया न भवति, अपि तु कथाभिः, कविताभिः, गीतैः, नाटकैः, संवादैः, चित्रैः, क्रीडाभिः विविधसाहित्यिकमाध्यमैश्च अपि तेषां मनांसि संस्काराः निर्मीयन्ते। अतः बालसाहित्यस्य कार्यं केवलं बालकस्य मनोरञ्जनं न, अपि तु तस्य बौद्धिकविकासस्य, भावात्मकपरिपक्वतायाः, कल्पनाशक्ति-विकासस्य, नैतिकमूल्यबोधस्य सामाजिकचेतनायाश्च निर्माणमपि भवति। भारतीयपरम्परायां साहित्यस्य प्रयोजनं केवलं मनोरञ्जनपर्यन्तं सीमितं न मन्यते। प्रसिद्धं वचनम्—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परिनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥[1]

अनेन पद्येन साहित्यस्य बहुविधप्रयोजनं सूचितं भवति। बालसाहित्ये अपि मनोरञ्जनेन सह शिक्षणं, संस्कारः, व्यवहारज्ञानं सामाजिकबोधश्च समन्विताः भवन्ति। आधुनिके युगे बालकः पुस्तकस्य पृष्ठमात्रेण सम्बद्धो नास्ति। सः चलदूरभाषं, सङ्गणकम्, टेबलेट्, डिजिटलपटलम्, श्रव्यसामग्रीम्,

दृश्यसामग्रीम् विविधप्रकारकान् अन्तरक्रियात्मकमाध्यमान् चोपयुङ्क्तं वर्तते। अतः यदि संस्कृतबालसाहित्यं आधुनिकबालकस्य समीपं नेतव्यम्, तर्हि तस्य प्रस्तुतीकरणे नूतनप्रौद्योगिकीमाध्यमानां समुचितः प्रयोगः आवश्यको वर्तते।

प्रौद्योगिकीसिद्धान्तस्य संकल्पना- प्रौद्योगिकीति पदं प्रकृष्टेन योगेन साधनानां प्रयोगः इत्यर्थदिशा बोधयितुं शक्नोति। आधुनिकसन्दर्भे प्रौद्योगिकी नाम वैज्ञानिकज्ञानस्य व्यावहारिकप्रयोग इति। सङ्गणकः, अन्तर्जालम्, डिजिटलमाध्यमानि, कृत्रिमबुद्धिमत्ता, श्रव्य-दृश्यप्रणालयः, चलदूरभाषानुप्रयोगाश्च इत्यादयः आधुनिकप्रौद्योगिक्याः प्रमुखानि रूपाणि सन्ति। बालसाहित्ये प्रौद्योगिकीसिद्धान्तस्य मूलं त्रिषु पक्षेषु स्थापयितुं शक्यते- सृजनप्रक्रियायां प्रौद्योगिकी, प्रस्तुतीकरणे प्रौद्योगिकी, वितरण-पठन- शिक्षणप्रक्रियासु च प्रौद्योगिकी अर्थात् लेखकः प्रौद्योगिकीसाधनैः कथां रचयितुं शक्नोति, चित्रकारः डिजिटलचित्राणि निर्मातुं शक्नोति, सम्पादकः ई-पुस्तकं सिद्धं कर्तुं शक्नोति, शिक्षकः तां सामग्रीं कक्षायां प्रयोजयितुं शक्नोति, बालकः च तां सामग्रीं श्रुत्वा, दृष्ट्वा, पठित्वा, क्रीडित्वा वा अधिगन्तुं शक्नोति। एवं प्रकारेण प्रौद्योगिकी केवलं बाह्यसाधनं न भूत्वा सम्पूर्णबालसाहित्यव्यवस्थायाः संरचनात्मकतत्त्वं भवति।

आधुनिकसंस्कृतबालसाहित्यस्य स्वरूपम्- संस्कृतबालसाहित्यस्य परम्परा अत्यन्तं प्राचीना वर्तते। पञ्चतन्त्रे पशुपक्षिणां माध्यमेन नीतिः प्रतिपादिता। हितोपदेशे मैत्री, नीति, व्यवहारज्ञानञ्च सावधानता शिक्ष्यते। रामायण-महाभारतयोः अनेकाः प्रसङ्गाः बालमनोविकासाय प्रेरणादायकाः सन्ति। पुराणेषु ध्रुवः, प्रह्लादः, नचिकेताः, कृष्णः इत्यादयः बालचरित्रस्य आदर्शरूपाणि भवन्ति, किन्तु आधुनिकबालसाहित्यपरम्परायां सोपानानि परिवर्तितानि सन्ति। आधुनिकबालकः विज्ञानम्, अन्तरिक्षम्, पर्यावरणम्, रोबोट्, कम्प्यूटर्, क्रीडाचक्रम्, सामाजिकजीवनम्, प्रकृतिः, मित्रता, वैविध्यम्, शान्तिः इत्यादीन् विषयान् अपि ज्ञातुमिच्छति। अतः आधुनिकसंस्कृतबालसाहित्यस्य विषयक्षेत्रं विस्तृततरं जातमिति विज्ञायते। कथा- गीत- कविता- नाटक- चित्रकथा- जीवनी- विज्ञानकथा- पर्यावरणकथा- ऐतिहासिककथेत्यादीनाञ्च विविधरूपाणां आवश्यकता ज्ञायते। प्रौद्योगिक्याः प्रभावेन साहित्यस्य मूलभूतस्वरूपे परिवर्तनं दृश्यते। पूर्वं बालकः पुस्तकं पठति स्म; अधुना सः पुस्तकं पठन् एव चित्रं पश्यति, शब्दं शृणोति, चलचित्रं निरीक्षते, प्रश्नानाम् उत्तरं ददाति कथायाश्च पात्रैः सह अन्तःक्रियां करोति सम्पादयति वा। अतः आधुनिकबालसाहित्यस्य स्वरूपं पाठ्य-श्रव्य-दृश्य-श्रव्यदृश्य-अन्तःक्रियात्मक-वैयक्तिकीकृत इति विकासक्रमेण गच्छति। संस्कृतबालसाहित्यस्य कृते अयं परिवर्तनक्रमः विशेषतः महत्त्वपूर्णो विद्यते, यतोहि संस्कृतस्य उच्चारणम्, शब्दरूपम्, वाक्यरचना अर्थबोधश्च श्रव्य-दृश्यसाधनैः अधिकं सुलभतया शिक्षयितुं शक्यते। ई-पुस्तकं आधुनिकसंस्कृतबालसाहित्यस्य सर्वाधिकं सुलभं स्वरूपं विद्यते। मुद्रितपुस्तकस्य डिजिटलरूपान्तरेण बालकः एकस्मिन् उपकरणे बहूनि पुस्तकानि स्थापयितुं शक्नोति। ई-पुस्तकेषु निम्नलिखिताः सुविधाः सम्भवन्ति- अक्षरपरिमाणपरिवर्तनम्, शब्दार्थप्रदर्शनम्, उच्चारणश्रवणम्, चित्रसमावेशः, चलचित्रसंयोजनम्, प्रश्नोत्तरव्यवस्था, शब्दान्वेषणं, बहुभाषिक-अर्थप्रदर्शनञ्च। उदाहरणतः सिंहः इति शब्दं बालकः पठति चेत्, तत्र सिंहस्य चित्रं, संस्कृतोच्चारणम्, हिन्दी-अङ्ग्लभाषयोः अर्थः तस्य च विषये लघुविवरणं दातुं शक्यते। एवं प्रकारेण एकः शब्दो बहुमाध्यमीयानुभवस्य केन्द्रं भवति। सर्वे बालकाः समानरीत्या न पठन्ति। केचन श्रवणेन शीघ्रं गृह्णन्ति, केचन चित्रदर्शनेन, केचन स्वयंपठनद्वारा च। अतः श्रव्यसाहित्यस्य महत्त्वम् अत्यधिकं भवति। संस्कृतकथानां श्रव्यरूपेण प्रस्तुतीकरणेन च संस्कृतोच्चारणस्य परिष्कारो भवति, श्रवणकौशलं विकसितं भवति, शब्दस्मरणशक्तिः वर्धते, कथाग्रहणक्षमता विकसिता भवति, छन्दोबद्धकाव्यस्य च लयबोधो भवति। विशेषतः संस्कृतभाषाशिक्षणे श्रव्यसामग्री अत्यन्तोपयोगिनी भवति। बालकः पुनः पुनः श्रुत्वा शब्दानां स्वाभाविकं उच्चारणं ज्ञातुं शक्नोति।

दृश्यश्रव्यसामग्री बालसाहित्यस्य प्रभावं बहुगुणितं कर्तुं शक्नोति। कथायाः पात्राणि, स्थानानि, घटनाः, प्रकृतिदृश्यानि च चलचित्ररूपेण प्रदर्शयितुं शक्यन्ते। यथा अभिनव-पञ्चतन्त्रस्य कथा इत्यस्य डिजिटलरूपे कथा, चित्रम्, संवादः, संस्कृतोच्चारणम्, पृष्ठभूमिसङ्गीतम्, प्रश्नोत्तरं चेत्येतेषां समन्वयः कर्तुं शक्यते। अनेन बालकः केवलं कथां न पठति, अपि तु कथां अनुभवति। एषः अनुभवात्मकशिक्षणस्य महत्त्वपूर्णः पक्षो वर्तते। एनीमेशन आधुनिकबालकस्य प्रियं साधनं विद्यते। संस्कृतकथानां एनीमेशनरूपान्तरेण प्राचीनकथाः आधुनिकबालकस्य मनोवृत्त्यानुकूलाः कर्तुं शक्यन्ते। पञ्चतन्त्रस्य पशुपात्राणि, कृष्णस्य बाललीलाः, ध्रुवस्य कथा, नचिकेतसः जिज्ञासा, हितोपदेशस्य कथाः इत्यादयश्च एनीमेशनमाध्यमेन रोचकतया प्रतिपादयितुं शक्यन्ते। किन्तु एनीमेशननिर्माणे मूलकथायाः भावः, सांस्कृतिकसन्दर्भः नैतिकसन्देशश्च नष्टो न भवेत्। केवलं मनोरञ्जनप्रधानं रूपान्तरणं संस्कृतबालसाहित्यस्य उद्देश्यं संकुचितं कर्तुं शक्नोति।

चलदूरभाषानुप्रयोगाः- आधुनिकबालकस्य जीवनस्य प्रमुखं डिजिटलसाधनं चलदूरभाषयन्त्रं वर्तते। संस्कृतबालसाहित्याय विशेषानुप्रयोगाः निर्मातुं शक्यन्ते। उदाहरणरूपेण संस्कृतबालकथा नाम अनुप्रयोगे कथाः, गीतानि, श्लोकाः, चित्रकथाः, प्रश्नोत्तराणि च स्थापयितुं शक्यन्ते, संस्कृतशब्दमाला इत्यत्र चित्राधारितशब्दज्ञानम्, बालसंस्कृतम् इत्यत्र सरलसंवादाः, श्लोकमञ्जरी इत्यत्र बालोपयोगिनः श्लोकाश्च। एवं प्रकारेण अनुप्रयोगः केवलं पुस्तकस्य डिजिटलप्रतिरूपं न भूत्वा शिक्षणस्य अन्तःक्रियात्मकं माध्यमं भवति। यथा-

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥[2]

अयं श्लोको विद्यायाः व्यापकं महत्त्वं प्रतिपादयति। आधुनिकप्रौद्योगिक्याः माध्यमेन बालकेभ्यः ज्ञानं सरलतया सुलभतया च प्रदातुं शक्यते। अतः ई-पुस्तकानि, डिजिटल-पाठाः, शैक्षिक-अनुप्रयोगाः, एनीमेशन-चित्राणि, श्रव्य-दृश्य-सामग्री च विद्याप्रसारस्य प्रभावी-साधनानि भवन्ति। एतेषां प्रौद्योगिकीमाध्यमानां समुचितप्रयोगेन बालकानां ज्ञानार्जनप्रक्रिया अधिका रुचिकरा, सुगमा, प्रभावशालिनी च भवति। यथा-

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च॥[3]

अस्मिन् श्लोके ज्ञानप्राप्तेः विविधानि स्रोतांसि निर्दिष्टानि सन्ति। आचार्यः, स्वबुद्धिः, सहपाठी तथा अनुभव—एते ज्ञानार्जनस्य प्रमुखाः साधनाः सन्ति। आधुनिककाले प्रौद्योगिकी एतेषां सर्वेषां साधनानां समन्वयं कृत्वा शिक्षण-अधिगमन-प्रक्रियाम् अधिकं प्रभावशालिनीं करोति।

न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥[4]

अस्मिन् सुभाषिते विद्यायाः अक्षयधनत्वं प्रतिपादितं विद्यते। धनस्य अन्येषां प्रकाराणां विपरीतं विद्याधनं न चौरैः हर्तुं शक्यते, न च तस्य विभाजनं भवति। प्रत्युत ज्ञानस्य वितरणेन तस्य वृद्धिरेव भवति। आधुनिकप्रौद्योगिकी अस्य विद्याधनस्य संरक्षणे, प्रसारणे तथा सार्वजनीनीकरणे महत्त्वपूर्णं साधनं भवति। गेमिफिकेशन अर्थात् क्रीडातत्त्वानां शिक्षणे प्रयोगः। बालकस्य स्वाभाविकक्रीडाप्रवृत्तिं संस्कृतशिक्षणेन सह योजयितुं शक्यते। उदाहरणार्थं बालकः फलम् इति चित्रं पश्यति। तस्य नाम संस्कृतेन चयनं करोति। सम्यगुत्तरं दत्ते अंकः प्राप्यते। क्रमशः स्तराः वर्धन्ते। एवं शिक्षणं क्रीडारूपं भवति। एतादृशेन प्रयोगेण उत्साहो वर्धते, पुनरावृत्तिः सहजतया भवति, स्मरणशक्तिः दृढा भवति, बालकस्य सक्रियसहभागिता च भवति,किन्तु प्रतियोगिताप्रधानता अत्यधिकं न भवेत्। शिक्षणस्य मूलोद्देश्यं विस्मृत्य केवलं अंकप्राप्तिः लक्ष्यं न भवेत्।

कृत्रिमबुद्धिमत्तायाः भूमिका- कृत्रिमबुद्धिमत्ता आधुनिकप्रौद्योगिक्याः महत्त्वपूर्णतमेषु सोपानेषु अन्यतमा अस्ति। बालसाहित्ये तस्याः प्रयोगः विविधप्रकारेण सम्भवति। कृत्रिमबुद्धिमत्तया बालकस्य स्तरानुकूलं पाठ्यं निर्मातुं शक्यते, शब्दार्थाः प्रदातुं शक्यन्ते, उच्चारणस्य अभ्यासं कर्तुं शक्यते, प्रश्नोत्तरनिर्माणं सम्भवति, कथायाः विभिन्नानि रूपाणि निर्मातुं शक्यन्ते,चित्रनिर्माणे सहायता लभ्यते, बालकस्य अभ्यासानुसारं सामग्रीं परिवर्तयितुञ्च शक्यते, परन्तु कृत्रिमबुद्धिमत्ता स्वयं अन्तिमप्रामाणिकस्रोतो न स्वीकरणीया। संस्कृतभाषायां व्याकरणिकदोषाः, अर्थदोषाः, संदर्भदोषाः वा सम्भवन्ति। अतः विशेषज्ञानां समीक्षा अनिवार्या वर्तते। परम्परागतपुस्तकं सर्वेभ्यः बालकेभ्यः समानं पाठ्यं ददाति। डिजिटलप्रौद्योगिकी तु बालकस्य व्यक्तिगतस्तरानुसारं सामग्रीं परिवर्तयितुं शक्नोति। यदि बालकः प्रारम्भिकस्तरे अस्ति तर्हि बालकः विद्यालयं गच्छति, इति सरलवाक्यं दातुं शक्यते। उन्नतस्तरे बालकः प्रतिदिनं प्रातःकाले विद्यालयं प्रति गच्छति, इति विस्तृतवाक्यं दातुं शक्यते। एवं कठिनता क्रमशः वर्धयितुं शक्यते। अयं वैयक्तिकीकृतशिक्षणस्य आधारो भवति। बालसाहित्यस्य सफलतायाः प्रमुखः आधारो बालमनोविज्ञानं विद्यते। बालकः जिज्ञासुः, कल्पनाशीलः, चञ्चलः, अनुकरणशीलः क्रीडाप्रियश्च भवति। अतः बालसाहित्ये जिज्ञासा, कल्पना, क्रीडा, कथा, दृश्यता, सहभागिता चेत्येषां समन्वयः अपेक्षितो वर्तते। प्रौद्योगिकी एतानि सर्वाणि तत्त्वानि एकत्रं स्थापयितुं समर्था वर्तते, परन्तु प्रौद्योगिकी स्वयं लक्ष्यं न, साधनमेव। यदि बालकः निरन्तरं केवलं पर्दं पश्यति तथा चिन्तनं, संवादं, लेखनं, प्रत्यक्षानुभवं च न्यूनं करोति, तर्हि साहित्यस्य व्यापकशैक्षिकप्रयोजनं बाधितं भवेत्। संस्कृतभाषाशिक्षणे प्रौद्योगिक्याः महत्त्वं विशेषतः वर्तते। संस्कृतस्य सन्धिः, समासः, विभक्तिः, धातुरूपाणि, शब्दरूपाणि, उच्चारणम् इत्यादीनि विषयाः दृश्यश्रव्यसाधनैः अधिकं सुगमाः कर्तुं शक्यन्ते। यथा- रामः वनं गच्छति इति वाक्यं प्रदर्श्य रामः कर्ता, वनम् कर्म, गच्छति क्रिया, इति दृश्यचिह्नैः स्पष्टं कर्तुं शक्यते। तथैव रामः, रामम्, रामेण, रामाय इत्यादीनां रूपाणां डिजिटलसारणीद्वारा अभ्यासं कर्तुं शक्यते। संस्कृतभाषायां शुद्धोच्चारणस्य विशेषं महत्त्वं भवति। डिजिटलश्रव्यसाधनैः बालकः शुद्धोच्चारणं श्रुत्वा अनुकरणं कर्तुं शक्नोति। विशेषतः स्वरः, व्यञ्जनम्, महाप्राण-अल्पप्राणभेदः, घोष-अघोषभेदः, अनुस्वारः, विसर्गः, उदात्त-अनुदात्त-स्वरितश्चेत्यादीनां अभ्यासः श्रव्य-दृश्यसाधनैः अधिकं प्रभावयुक्तं भवितुमर्हति।

संस्कृतबालकथायाः डिजिटलरूपान्तरणम्- बालकथायाः डिजिटलरूपान्तरणे केवलं मुद्रितपाठस्य स्क्रीनस्थापनं पर्याप्तं न भवति। डिजिटलमाध्यमस्य विशेषगुणानां प्रयोगः करणीय इति। उदाहरणतः मुद्रितकथाः कथा-चित्रम्-प्रश्नश्च, डिजिटलरूपंकथा-चित्रम्-श्रवणम्-संवादः-प्रश्नः-क्रीडा-पुनरावृत्तिः-मूल्याङ्कनञ्च। अतः डिजिटलसाहित्यं बहुमाध्यमीयं भवति। वस्तुतः पञ्चतन्त्रं बालसाहित्यस्य क्षेत्रे विशेषमहत्त्वपूर्णं स्थानं धारयति। तस्य कथासु पशुपक्षिणः, मित्रता, विश्वासः, बुद्धिः, सावधानता, नीतिः, सहयोगः व्यवहारज्ञानञ्च प्रमुखतया दृश्यते। आधुनिकप्रौद्योगिक्या पञ्चतन्त्र-कथाः डिजिटलचित्रकथारूपेण, एनीमेशनरूपेण, श्रव्यकथारूपेण, प्रश्नोत्तरअनुप्रयोगरूपेण, अन्तरक्रियात्मकक्रीडा-रूपेण, बालनाट्यरू-पेण च प्रतिपादयितुं शक्यन्ते। यथा मित्रभेदः इत्यस्य कथानकं बालकः केवलं पठति न, अपि तु पात्रानां निर्णयान् स्वयमेव चयनं कृत्वा परिणामं ज्ञातुं शक्नोति। इयं नीतिः केवलं श्रुता न भवति, अपि तु अनुभविता भवति। बालसाहित्यस्य महत्त्वपूर्णं प्रयोजनं मूल्यशिक्षणं विद्यते। सत्यं, अहिंसा, मैत्री, सहयोगः, दया, पर्यावरणस्नेहः, कर्तव्यबोधः, राष्ट्रस्नेहः, सामाजिकसमरसता चेत्यादी-नि मूल्यानि बालसाहित्येन विकसितुं शक्यन्ते। प्रौद्योगिक्या मूल्यकथा अधिकप्रभावशालिनीं कर्तुं शक्यते, किन्तु नैतिकोपदेशः अत्यधिको न भवेत्। कथानकस्य स्वाभाविकविकासेन मूल्यबोधो जायेत्। यथा मित्रताविषयिणीं कथायां बालकः पात्राणां व्यवहारं पश्यति, तेषां निर्णयानां परिणामं ज्ञात्वा स्वयं निष्कर्षं करोति। अयं अनुभवाधारितो मूल्यबोधो भवति।

सामाजिकसमरसता डिजिटलबालसाहित्यञ्च- आधुनिकसमाजे वैविध्यं महत्त्वपूर्णं विद्यते। बालसाहित्ये विभिन्नप्रदेशीयाः, भाषिकाः, सांस्कृतिकाः सामाजिकपृष्ठभूमियुक्तानि पात्राणि प्रतिपादयितुं शक्यन्ते। संस्कृतबालसाहित्ये वसुधैव कुटुम्बकम् इत्यस्य व्यापकभावना कथारूपेण विकसितुं शक्यते। बालकः ज्ञातुं शक्नोति यत् भिन्नता संघर्षस्य कारणं न, अपि तु समृद्धेः आधारः भवितुमर्हति। पुनः आधुनिकसमाजस्य प्रमुखेषु प्रश्नेषु पर्यावरणसंरक्षणम् अन्यतमं वर्तते। बालसाहित्ये वृक्षाः, नद्यः, पशवः, पक्षिणः, पर्वताः प्रकृतिश्च कथापात्ररूपेण प्रस्तुतुं शक्यन्ते। डिजिटलमाध्यमेन बालकः वृक्षारोपणम्, जलसंरक्षणम्, स्वच्छता, जैववैविध्यं, पशुपक्षिसंरक्षणं चेत्यादीनां विषयाणां दृश्यात्मकज्ञानं प्रासुं शक्नोति। अतः संस्कृतबालसाहित्यं आधुनिकपर्यावरणचेतनया सह सम्बद्धं कर्तुं प्रौद्योगिकी समर्था अस्ति। प्रौद्योगिकी केवलं आधुनिकतायाः साधनं नास्ति; सा लोकपरम्पराणां संरक्षणस्य माध्यममपि भवितुमर्हति। भारतीयलोककथाः, लोकगीतानि, लोकोक्तयः, उत्सवाः, संस्काराः, ग्रामीणजीवनम्, पारम्परिकक्रीडाश्चेत्यादयः डिजिटलरूपेण संग्रहीतुं शक्यन्ते। एवं प्रकारेण तकनीकिसंग्रहः भविष्यत्कालस्य कृते सांस्कृतिकस्मृतिकोशरूपेण कार्यं करिष्यति। प्रौद्योगिकी आगतेन शिक्षकस्य भूमिका समाप्ता न भवति। अपि तु तस्य भूमिका अधिकं महत्त्वपूर्णा भवति। शिक्षकः सामग्रीं चिनोति, स्रोतस्य विश्वसनीयतां परीक्षते, बालकस्य आवश्यकतां ज्ञात्वा सामग्रीं प्रयुङ्क्ते, तकनीकिसामग्रीं प्रत्यक्षशिक्षणेन संयोजयति, बालकस्य प्रश्नान् प्रेरयति, आलोचनात्मकचिन्तनञ्च विकसार्थं साहाय्यं करोति। अतः शिक्षकः सूचनादाता इत्यस्मात् अधिगममार्गदर्शकश्चेति भूमिकां स्वीकरोति। बालकस्य डिजिटलजीवनस्य निर्माणे अभिभावकस्य अपि महत्त्वपूर्णा भूमिका अस्ति। प्रौद्योगिकीसाधनानां

अनियन्त्रितप्रयोगः नोचितः। अभिभावकः बालके पठनस्य प्रवृत्तिम्, संवादस्य प्रवृत्तिम्, पुस्तकपठनम्, सृजनात्मककार्यं, प्रत्यक्षप्रकृत्यनुभवश्चेत्यादीनि विकसितुं प्रेरयति। डिजिटलसाहित्यं कुटुम्बसहितं पठितुं श्रावयितुं वा शक्यते। अनेन साहित्यं केवलं व्यक्तिगतानुभवो न भवति, अपि तु पारिवारिकसंवादस्य माध्यमं भवति। प्रौद्योगिकी बालकस्य सृजनशीलतां वर्धयितुं शक्नोति। बालकः केवलं कथां पठेत् इति न, अपि तु स्वयमेव कथां रचयेत्, चित्रं निर्मायेत्, पात्रं कल्पयेत्, संवादं लिखेत्, कथां श्रव्यरूपेण अभिलेखयेत्। एवं बालकः पाठकः-श्रोता-दर्शकः-सहभागी-स्रष्टा चेति विकासक्रमं प्राप्नोति। अयं आधुनिकबालसाहित्यस्य अत्यन्तं महत्त्वपूर्णः परिवर्तनबिन्दुः अस्ति। संस्कृतबालसाहित्यस्य प्रसारे बहुभाषिकप्रौद्योगिकी अत्यन्तोपयोगिनी भवितुमर्हति। संस्कृतकथायाः सह हिन्दी, आङ्ग्ल, मराठी, बंगाली, तमिल, तेलुगु इत्यादिभाषासु अर्थः प्रदातुं शक्यते। अनेन संस्कृतभाषायाः शिक्षणं केवलं संस्कृतपृष्ठभूमियुक्तबालकेभ्यः सीमितं न भवति। अन्यभाषाभाषिणः अपि संस्कृतसाहित्यं सुलभतया पठितुं शक्नुवन्ति।

तकनीकिसंग्रहालयाः- संस्कृतबालसाहित्यस्य अनेकाः प्राचीनाः आधुनिकाश्च सामग्रीः विभिन्नेषु स्थानेषु विखण्डिताः सन्ति। डिजिटलसंग्रहालयनिर्माणेन बालकथाः, बालगीतानि, बालनाटकानि, चित्रकथाः, पुरातनपत्रिकाः, पाण्डुलिपयः, ध्वनिमुद्रणानि, चलचित्रसामग्री चेत्यादीनां संरक्षणं सम्भवति। एते तकनीकिसंग्रहाः अनुसन्धानस्य अपि महत्त्वपूर्णं साधनं भविष्यन्ति। प्रौद्योगिकीसमन्वितं संस्कृतबालसाहित्यं निम्नलिखितेषु क्षेत्रेषु उपयोगी भवितुमर्हति- शब्दभण्डारः, उच्चारणम्, वाक्यरचना च विकसितुं शक्यते, तर्कशक्तिः, स्मरणशक्तिः, समस्या-समाधानक्षमता च वर्धते, कथापात्रैः सह तादात्म्येन सहानुभूतिः विकसितुं शक्नोति, सहयोगः, मैत्री, संवादः तथा सामाजिकउत्तरदायित्वबोधः वर्धते, सत्यं, दया, न्यायः, कर्तव्यं सदाचारश्च कथामाध्यमेन बोध्यते। आधुनिकसंस्कृतबालसाहित्ये तकनीकिनैतिकता विशेषतः विचारणीया। बालकस्य कृते निर्मिता सामग्री सत्याधारिता, आयुवर्गानुकूलिता, सांस्कृतिकदृष्ट्या संवेदनशीला, भाषाशुद्धा, शैक्षिकदृष्ट्या उपयोगिनी च भवति। तथैव बालकस्य व्यक्तिगतसूचनानां संरक्षणम्, सुरक्षिततकनीकिपरिवेशः उत्तरदायित्वपूर्णप्रयोगश्च महत्त्वपूर्णो वर्तते। डिजिटलयुगे साहित्यस्य प्रतिलिपिकरणमत्यन्तं सुलभं भवति। अतः लेखकस्य, प्रकाशकस्य चित्रकारस्य बौद्धिकस्वामित्वस्य च संरक्षणमावश्यकं भवति। संस्कृतबालसाहित्यस्य तकनीकिप्रकाशने स्पष्टं करणीयं यत् कः लेखकः? कः प्रकाशकः? कस्य स्वामित्वम्? कस्य उपयोगस्य अनुमतिः अस्ति? वा एतादृशाः प्रश्नाः भविष्ये संस्कृततकनीकिसाहित्यस्य विकासे महत्त्वपूर्णाः भविष्यन्ति। आधुनिकसंस्कृतबालसाहित्यस्य समक्षं सर्वाधिकं महत्त्वपूर्णं कार्यं परम्परा-आधुनिकतयोः सन्तुलनमस्ति। केवलं परम्परानिष्ठता बालकस्य आधुनिकरुचिं न पूरयितुं शक्नोति। केवलं आधुनिकतावादः संस्कृतसाहित्यस्य सांस्कृतिकमूलाधारं दुर्बलं कर्तुं शक्नोति। डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायः इति कथासङ्ग्रहे भविष्यकालस्य प्रौद्योगिकीविषये प्रतिपादिता वर्तते। अस्यां कथायां 2090 तमे वर्षे कृत्रिमबुद्धेः (AI) वर्धमानप्रयोगेन जायमानानां दुष्प्रभावाणां प्रति सङ्केतो दृश्यते। **नवत्यधिकद्विसहस्रतमस्य संवत्सरस्य कश्चित् प्रातःकालः प्रचलति। घटिकायन्त्राणि सन्ति, द्रष्टुं मानवा न सन्ति। नगराणि सन्ति, नागरा न सन्ति। कृत्रिमबुद्धिप्रयोगबाहुल्यात् मनुष्याः नैराश्यमनुभूय स्वात्मघातं कृतवन्तः। यन्त्रैर्मनुष्या हताः, मनुष्यैर्यन्त्राणि नाशितानि।**[5] अस्यां कथायां विज्ञानस्य द्विविधं स्वरूपं प्रदर्शितमस्ति। विज्ञानं विश्वस्मै बहुविधाः सुविधाः प्रदत्तवान्, परन्तु तस्य दुरुपयोगः समग्रविश्वस्य विनाशस्य कारणमपि भवितुमर्हति। अस्याः भावनायाः अभिव्यक्तिः निम्नलिखितेन वाक्येन कृता अस्ति- विज्ञानेन सर्वमपि दत्तं विश्वस्मै, अथ च सर्वमपि अपहृतम्। अस्यां कथायां लोपा नामिका एका पात्रविशेषा अस्ति। सा एकस्य तपस्विनः सहयोगेन पुनः संस्कृतेः नूतनमध्यायं रचयति। एतेन कथाकारस्य आशावादी दृष्टिकोणः अभिव्यज्यते। विनाशानन्तरमपि मानवः स्वप्रयत्नेन, सांस्कृतिकमूल्यानां संरक्षणेन, प्रकृतेः संवर्धनेन च नूतनस्य समाजस्य निर्माणं कर्तुं शक्नोति। अस्य भावस्य चित्रणं कथायाः अन्तिमांशे एवं दृश्यते। **ततः पश्चात् पुनरपि यज्ञशालायाम् अग्निः स्थापितो भवति। वृक्षेषु फलानां सौरभं प्रसरति। क्षेत्रं शस्यकणिशैः रमणीयं भवति। कुटीरे शिशुरोदनं श्रूयते। पुनरपि संस्कृतेर्नवोऽध्यायः प्रारभ्यते।**[6] एवं कथाकारः प्रौद्योगिक्याः अनियन्त्रितप्रयोगस्य दुष्परिणामान् प्रदर्शयन् अपि मानवजीवनस्य पुनर्निर्माणे, सांस्कृतिकचेतनायाः पुनर्जागरणे, प्रकृतिसंरक्षणे च दृढाम् आशां प्रकटयति। अतः इयं कथा आधुनिकसंस्कृतसाहित्ये विज्ञानस्य विवेकपूर्णप्रयोगस्य, मानवीयमूल्यानां संरक्षणस्य, सांस्कृतिकपुनरुत्थानस्य च महत्त्वं प्रतिपादयति।

आधुनिकसंस्कृतबालसाहित्यस्य भविष्यकालः- भविष्ये संस्कृतबालसाहित्यं बहुरूपी भवितुं शक्नोति। एकैव कथा पुस्तकरूपेण, ई-पुस्तकरूपेण, श्रव्यरूपेण, एनीमेशनरूपेण, अन्तःक्रियात्मकक्रीडारूपेण, शैक्षिक-अनुप्रयोगरूपेण चोपलब्धं भवितुं शक्नोति। कृत्रिमबुद्धिमत्तायाः साहाय्येन बालकस्य भाषास्तरानुसारं कथा परिवर्तिता भवितुं शक्नोति। तथापि मानवीयलेखकस्य सृजनात्मकदृष्टिः, सांस्कृतिकज्ञानं नैतिकविवेकश्च केन्द्रस्थाने एव स्थापनीयः। आधुनिकसंस्कृतबालसाहित्ये प्रौद्योगिकीसिद्धान्तं निम्नलिखितरूपेण प्रतिपादयितुं शक्यते। यथा- बालकेन्द्रितं, मूल्याधारितं, भाषाशुद्धं, बहुमाध्यमीयं, अन्तःक्रियात्मकं, वैयक्तिकीकृतं च साहित्यं प्रौद्योगिकीसाधनैः निर्मीयते चेत् आधुनिकसंस्कृतबालसाहित्यस्य प्रभावक्षमता वर्धते। अस्याः प्रौद्योगिक्याः पञ्च प्रमुखाः आधाराः सन्ति- बालकेन्द्रितता, भाषाशुद्धता, मूल्यपरकता, प्रौद्योगिकीसमन्वयः, मानवीय-मार्गदर्शनञ्च। एतेषां समन्वयेन एव प्रौद्योगिकीसिद्धान्तः सार्थको भवति। आधुनिकयुगे विज्ञानस्य प्रौद्योगिक्याश्च विकासेन मानवजीवनस्य प्रायः सर्वेषु क्षेत्रेषु व्यापकः परिवर्तनः समुपजातः। शिक्षाक्षेत्रे, साहित्ये, सञ्चारव्यवस्थायां, मनोरञ्जनक्षेत्रे, ज्ञानविज्ञाने च प्रौद्योगिक्याः प्रभावः स्पष्टतया दृश्यते। साहित्यस्य महत्त्वपूर्णे क्षेत्रे बालसाहित्येऽपि प्रौद्योगिक्याः प्रभावः समुपलभ्यते। विशेषतः आधुनिकसंस्कृतबालसाहित्यस्य विकासे प्रौद्योगिकी महत्त्वपूर्णं साधनमस्ति। प्रौद्योगिक्याः साहाय्येन संस्कृतबालसाहित्यं केवलं मुद्रितपुस्तकेषु सीमितं न भवति, अपितु डिजिटल-माध्यमैः, ई-पुस्तकैः, श्रव्य-दृश्यसामग्रीभिः, चलच्चित्रैः, एनीमेशन-माध्यमैः, शैक्षिक-अनुप्रयोगैः, अन्तर्जालमाध्यमैश्च बालकानां समीपं सहजतया प्राप्यते। यथा संस्कृतेर्नवोऽध्यायेति काव्ये डॉ.हर्षदेवमाधवो वदति। भविष्यत्कालस्य नगरे इति कथा एतद् बोधयति यत् यन्त्रमानवाः (रोबोट्) केवलं हानिकराः एव न भवन्ति,

अपितु ते मनुष्याणाम् उपकारं कर्तुमपि समर्थाः भवन्ति।[7] चौर्यम् इति कथा अस्मान् तस्मात् सम्भावितात् संकटात् सावधानं करोति, येन सह अस्माकं सम्मुखीकरणं निकटभविष्ये भवितुं शक्नोति। यन्त्रमानवाः अस्माकं संस्थानेषु गुप्तचर्याकार्यं कर्तुं प्रवर्तिष्यन्ते इति सम्भावितं भयम् अस्मान् परितः वर्तते।[8] मातृत्वम् इति कथा पञ्चविंशतितमे शतके विद्यमानं यन्त्रमानवं केन्द्रे कृत्वा विरचिता अस्ति। अयं यन्त्रमानवः मारिया नामिकायै स्त्रियै प्रेम्णः अनुभूतिं कारयति। विज्ञानस्य प्रौद्योगिक्याः च साहाय्येन मारिया मातृत्वस्य सुखम् अनुभवति। यन्त्रस्य मानवस्य च मध्ये शारीरिक-प्रेमसम्बन्धोऽपि सम्भवितुं शक्नोतीति कल्पना अत्र कृता अस्ति। अस्याः कथायाः प्रसङ्गे निम्नलिखितं वाक्यम् उल्लेखनीयम्- विशेषज्ञानां परिश्रमः सफलः अभवत्। विशेषज्ञैः रोबर्टे प्रणयसंवेदना आरोपिताः आसन्। रोबर्टः प्रणयसंवेदनैः पारङ्गतः अभवत्।[9] आश्वासनम् इति कथायां कृत्रिमबुद्धेः (AI) सदुपयोगस्य वर्णनमस्ति। कथा पञ्जाबप्रदेशस्य कस्मिंश्चित् ग्रामे आरभते, यत्र एका वृद्धा माता स्वसैनिकपुत्रस्य आगमनस्य प्रतीक्षां कुर्वती जीवनं यापयितुं प्रयतते। सा प्रतिवासरं न, अपितु प्रति सप्ताहं दूरभाषमाध्यमेन पुत्रेण सह सम्भाषणं करोति। अस्याः कथायाः अन्तः आश्चर्यजनको वर्तते।[10] आधुनिकी तान्त्रिकी मनुष्याणां दुःखेषु साहाय्यं कुर्यादिति कथाकारस्य अभिप्रायः। विज्ञानं मनुष्यजातेर्हितार्थमेव अस्ति। दुर्जनाः कस्यचित् वाण्याः प्रतिरूपं कृत्वा वञ्चनां कुर्वन्ति इति साइबर-अपराधेषु प्रसिद्धम् अस्ति। अनेन कथाकारः प्रतिपादयति यत् आधुनिकप्रौद्योगिक्याः प्रयोगः मानवकल्याणाय भवेत्। तथापि दुर्जनाः स्वरानुकरणप्रविधेः दुरुपयोगं कृत्वा जनान् वञ्चयितुं शक्नुवन्ति। एतादृशाः अपराधाः अद्यत्वे साइबर-अपराधेषु अन्तर्भवन्ति। आत्महत्या इति कथा एतद् सूचयति यत् भविष्यत्काले कार्यभारस्य आधिक्येन केवलं मनुष्याः एव न, अपितु यन्त्रमानवाः अपि आत्मविनाशाय प्रवृत्ताः भवितुं शक्नुवन्ति। तनावस्य वृद्धौ ते कदाचित् अन्येषां हननमपि कर्तुं शक्नुयुः इति कल्पना अत्र कृता अस्ति। भविष्यत्काले अनृतवादिनां शठानां दुर्व्यवहारः मनुष्याणां दुर्गुणाश्च यन्त्रमानवेषु सङ्क्रान्ताः भविष्यन्ति किम्? कदाचिद् एवमेव भवेत्। मनुष्यैः समग्रा पृथ्वी दूषिता अस्ति, तर्हि यन्त्रमानवाः कथम् अदूषिताः भविष्यन्ति? कृत्रिमबुद्धिः (AI) अपि मनुष्यसृष्टा बुद्धिरस्ति, तत्र सात्त्विकता कथं भवेत्? एतेन कथाकारः प्रश्नमुत्थापयति यत् मनुष्यनिर्मितेषु यन्त्रेषु मानवानां दुर्गुणाः अपि सङ्क्रमिताः भवितुं शक्नुवन्ति किम्। मनुष्यनिर्मितत्वात् कृत्रिमबुद्धेः नैतिकस्वरूपमपि विचारणीयम् इति कथायाः प्रमुखः सन्देशः अस्ति।[11] मानसापहरणम् इति कथायां भविष्यत्काले वैज्ञानिकाः मनोमस्तिष्कस्य गुप्तसूचनाः अपहर्तुं मानसिकप्रवेशप्रविधेश्च (माइण्ड-हैकिङ्ग्) प्रयोगेण स्वकीयानि गुप्ताभियानानि सम्पादयितुं कथं समर्थाः भविष्यन्ति इति कल्पना कृता अस्ति। एषा कथा वैज्ञानिकप्रगतेः सम्भावितान् दुरुपयोगान् तथा मानवीयचेतनायाः गोपनीयतासम्बद्धान् प्रश्नान् प्रकाशयति।[12] भयम् इति कथा एतद् प्रदर्शयति यत् भविष्यत्काले यन्त्रमानवाः अपि स्वविनाशस्य भयम् अनुभवितुं प्रवृत्ताः भवितुं शक्नुवन्ति। अस्यां कथायां वाराणस्याः प्रसिद्धस्य मणिकर्णिकाघाटस्य वातावरणस्य माध्यमेन जीवनमृत्योः सम्बन्धे दार्शनिकं विवेचनं कृतमस्ति। अनेन कथाकारः जीवनस्य क्षणभङ्गुरतां, मृत्योः अनिवार्यतां, अस्तित्वसम्बद्धान् गम्भीरान् प्रश्नांश्च उपस्थापयति।[13] कर्तव्यम् इति कथा एतद् बोधयति यत् भविष्यत्काले यन्त्रमानवाः अपि पुत्रवत् दाहसंस्कारादीनां कर्तव्यानां निर्वहणे समर्थाः भविष्यन्ति। अस्यां कथायां यन्त्रमानवानां सामाजिकभूमिका, कर्तव्यपालनक्षमता तथा मानवीयसम्बन्धानां सन्दर्भे तेषां सम्भावितं योगदानं चित्रितमस्ति। कटुसत्यम्' इति कथा द्वात्रिंशत्तमे शतके कस्यचित् कालखण्डस्य चित्रणं करोति। तस्मिन् काले यान्त्रिकतायाः आधिक्येन मनुष्याः स्वाभाविकं स्वरूपं त्यक्तवन्तः भविष्यन्ति। विविधाभिः व्याधिभिः ते पीडिताः भविष्यन्ति इति कल्पना अत्र दृश्यते।अस्यां कथायां कथाकारः 'ज्ञानगञ्ज' नाम्नः अदृश्यस्य स्थानस्य वर्णनं करोति, यत् साधकानां तपस्यास्थलमस्ति। ध्यातव्यमस्ति यत् गोपीनाथकविराजमहोदयेन 'ज्ञानगञ्ज' इति पुस्तके हिमालयस्थपवित्राणां दिव्यानाम् आश्रमाणां वर्णनं कृतम् अस्ति। केचन जनाः एतदेव ज्ञानगञ्जं 'शम्भाला', 'सम्बल' अथवा 'शम्भल' इत्यादिभिः नामभिः अभिजानन्ति। अस्याः कथायाः माध्यमेन कथाकारः यान्त्रिकतायाः अतिप्रयोगस्य दुष्परिणामान्, मानवीयजीवनस्य स्वाभाविकतायाः ह्रासं, स्वास्थ्य-सम्बद्धान् प्रश्नान् तथा आध्यात्मिकचेतनायाः महत्त्वं च प्रतिपादयति। अस्य कथासङ्ग्रहस्य द्वितीये भागेऽपि द्वे कथाः समाविष्टे स्तः। तयोः कथयोः विषयवस्तु पूर्वोक्तकथाभ्यः भिन्ना अस्ति। अतः सम्पूर्णः कथासङ्ग्रहः विविधविषयाणां माध्यमेन आधुनिकविज्ञानस्य, प्रौद्योगिक्याः, मानवीयसम्बन्धानां, नैतिक-मूल्यानां भविष्यत्समाजस्य सम्भावितस्वरूपस्य च बहुमुखं चित्रणं करोति।

संस्कृतभाषा प्राचीनतमा, समृद्धा च भाषा अस्ति। अस्यां भाषायां ज्ञानस्य, नीतिशास्त्रस्य, धर्मस्य, दर्शनस्य, विज्ञानस्य, कलायाः च विपुलं साहित्यं विद्यते। बालकानां मनोरञ्जनाय, ज्ञानवर्धनाय, संस्कारनिर्माणाय च संस्कृतभाषायां कथाः, सुभाषितानि, नीतिकथाः, बालगीतानि, संवादाः, नाटिकाश्च रचितानि सन्ति। किन्तु आधुनिकजीवनशैल्यां बालकानां अध्ययनरुचौ परिवर्तनं जातम्। ते केवलं मुद्रितपुस्तकपठनमेव न इच्छन्ति, अपितु चित्रैः, ध्वनिभिः, चलचित्रैः, अन्तःक्रियात्मकमाध्यमैश्च ज्ञानं प्रासुमिच्छन्ति। अतः संस्कृतबालसाहित्यस्य विकासाय प्रौद्योगिक्याः समुचितः प्रयोगः आवश्यको वर्तते। प्रौद्योगिक्याः प्रथमं महत्त्वं ज्ञानप्रसारणे वर्तते। पूर्वं संस्कृतबालसाहित्यस्य पुस्तकानि केवलं विशिष्टेषु पुस्तकालयेषु, विद्यालयेषु वा उपलब्धानि आसन्। अधुना अन्तर्जालस्य माध्यमेन संस्कृतबालकथाः, बालगीतानि, सुभाषितानि, श्लोकाः, कथासङ्ग्रहाश्च विश्वस्य विभिन्नेषु भागेषु सहजतया प्राप्यन्ते। ई-पुस्तकानां माध्यमेन बालकाः सङ्गणकेषु, चलदूरवाणीयन्त्रेषु, टॅबलेट्-यन्त्रेषु वा संस्कृतसाहित्यं पठितुं शक्नुवन्ति। अनेन साहित्यस्य प्रसारः शीघ्रतरः भवति, तथा च अधिकाधिकाः बालकाः संस्कृतबालसाहित्येन सह सम्बद्धाः भवन्ति। प्रौद्योगिक्याः द्वितीयं महत्त्वं श्रव्य-दृश्य-माध्यमानां प्रयोगे वर्तते। बालकानां मनसि दृश्यस्य ध्वनेश्च प्रभावः अधिकः भवति। यदि संस्कृतकथा केवलं पठ्यते, तर्हि केषाञ्चित् बालकानां कृते सा कठिनतरा भवितुमर्हति, किन्तु तस्याः कथायाः चित्रात्मकं, श्रव्यं, नाटकीयञ्च प्रस्तुतीकरणं कृतं चेत् बालकाः अधिकरुचिना तां कथां शृण्वन्ति, पश्यन्ति, अवगच्छन्ति च। एनीमेशन-माध्यमम् अपि संस्कृतबालसाहित्यस्य विकासे विशेषं महत्त्वं वहति। बालकाः चलच्चित्राणि कार्टून्-चित्राणि प्रति स्वाभाविकरूपेण आकृष्टाः भवन्ति। यदि संस्कृतकथानां पात्राणि, घटनाः, संवादाश्च एनीमेशन-माध्यमेन प्रस्तुताः भवन्ति, तर्हि बालकानां संस्कृतभाषायां रुचयः वर्धन्ते। कथानकस्य दृश्यरूपेण प्रस्तुत्या कठिनाः संस्कृतशब्दाः अपि सन्दर्भानुसारं सुगमतया

अवगन्तुं शक्यन्ते। अनेन संस्कृतभाषाशिक्षणं मनोरञ्जनपूर्वकं प्रभावी च भवितुमर्हति। शैक्षिकानुप्रयोगाः आधुनिकप्रौद्योगिक्याः अन्यतमं महत्त्वपूर्णं साधनमस्ति। मोबाइल-अनुप्रयोगानां माध्यमेन बालकाः संस्कृतवर्णमालां, शब्दज्ञानं, श्लोकपठनं, कथाश्रवणं, प्रश्नोत्तराभ्यासं, शब्दार्थज्ञानं च क्रीडारूपेण अधिगन्तुं शक्नुवन्ति। प्रश्नोत्तराधारिताः गतिविधयः, चित्राधारिताः अभ्यासाः, शब्दमेलनम्, स्मरणक्रीडाः इत्यादयः बालकानां सक्रियतां वर्धयन्ति। एवं प्रौद्योगिकी बालसाहित्यं केवलं पठनस्य विषयं न स्थापयित्वा अन्तःक्रियात्मकम् अधिगमसाधनमपि करोति। प्रौद्योगिक्याः साहाय्येन संस्कृतभाषायाः उच्चारणाभ्यासः अपि सम्भवति। श्रव्यसामग्रीद्वारा बालकाः श्लोकानां, गीतानां, संवादानां च शुद्धोच्चारणं श्रोतुं शक्नुवन्ति। पुनः पुनः श्रवणेन उच्चारणे प्रवाहः भाषाज्ञानं च वर्धते। विशेषतः संस्कृतं द्वितीयभाषारूपेण अधीयानानां बालकानां कृते एतादृशं श्रव्यसाधनमत्यन्तमुपयोगि भवति।

निष्कर्षः प्रौद्योगिकी बालसाहित्यस्य सृजनशीलतामपि प्रोत्साहयति। बालकाः स्वयं संस्कृतकथां रचयितुं, चित्रकथां निर्मातुं, लघुनाटिकां प्रस्तुतुं, संस्कृतगीतानि रचयितुं च शक्नुवन्ति। डिजिटल-माध्यमेषु बालकानां सृजनात्मकप्रतिभायाः प्रदर्शनस्य अवसरः लभ्यते। अनेन बालकः केवलं साहित्यस्य पाठको न भवति, अपितु साहित्यस्य स्रष्टा अपि भवति। तथापि प्रौद्योगिक्याः प्रयोगः विवेकपूर्णो भवति। अत्यधिकं यन्त्रनिर्भरत्वं बालकानां स्वाभाविकपठनाभ्यासं बाधितुं शक्नोति। अतः मुद्रितपुस्तकपठनम्, शिक्षकस्य मार्गदर्शनम्, अभिभावकानां सहयोगः तथा डिजिटल-माध्यमानां समुचितः उपयोगः—एतेषां समन्वयः आवश्यकः। बालसाहित्यस्य उद्देश्यं केवलं मनोरञ्जनं न, अपितु ज्ञानं, संस्कारः, नैतिकता, सामाजिकचेतना, सृजनशीलता चास्ति। अतः प्रौद्योगिकी एतानि उद्देश्यानि साधयितुं सहायकरूपेण प्रयोजनीया। अतः निष्कर्षरूपेण वक्तुं शक्यते यत् आधुनिकसंस्कृतबालसाहित्यस्य विकासे प्रौद्योगिकी महत्त्वपूर्णं साधनं वर्तते। ई-पुस्तकानि, डिजिटल-पाठाः, श्रव्य-दृश्यसामग्री, एनीमेशन, शैक्षिक-अनुप्रयोगाः, अन्तर्जालमाध्यमानि च संस्कृतबालसाहित्यस्य प्रसारं, लोकप्रियतां, शैक्षिकोपयोगितां च वर्धयन्ति। प्रौद्योगिक्याः माध्यमेन संस्कृतबालसाहित्यं आधुनिक-बालमनोविज्ञानस्य आवश्यकतानुसारं नूतनं स्वरूपं प्राप्नोति। यदि परम्परागतसंस्कृतसाहित्यस्य मूल्यबोधः आधुनिकप्रौद्योगिक्याः नवीनमाध्यमैः सह समन्वितो भवति, तर्हि संस्कृतबालसाहित्यं न केवलं वर्तमानपीढ्याः बालकेषु लोकप्रियं भविष्यति, अपितु भाविवंशानामपि ज्ञान-संस्कार-चरित्रनिर्माणे महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। आधुनिकसंस्कृतबालसाहित्यस्य विकासे प्रौद्योगि-कीसिद्धान्तः केवलं नूतनयन्त्रप्रयोगस्य विषयो नास्ति। अयं बालकस्य अधिगमप्रवृत्तिः, मनोवैज्ञानिकावश्यकता, भाषिकरुचिः सामाजिक-परिस्थितिश्च इत्येतैः सह सम्बद्धः व्यापकः साहित्यिक-शैक्षिकविमर्शो वर्तते। अस्माकं प्राचीनसाहित्ये बालजीवनस्य, शिक्षायाः, नीतिविचारस्य, प्रकृतिप्रेमस्य, मैत्रीभावस्य, सामाजिकसमरसतायाः नैतिकमूल्यानाञ्च विपुलं साहित्यं विद्यते। आधुनिकप्रौद्योगिकी तस्य ज्ञानभण्डारस्य नवीनवंशं प्रति सम्प्रेषणस्य शक्तिशाली माध्यमं भवितुमर्हति। किन्तु प्रौद्योगिकी सर्वेषां समस्यायानां समाधानमिति न मन्तव्यम्। आधुनिकसंस्कृतबालसाहित्यस्य आदर्शं स्वरूपं तादृशं भवेत् यत्र परम्परायाः प्रज्ञा, आधुनिकविज्ञानस्य शक्तिः, प्रौद्योगिक्याः क्षमता, बालमनोविज्ञानस्य सूक्ष्मबोधः तथा मानवीयमूल्यानां प्रतिष्ठा एते सर्वे एकत्र समागच्छन्ति। अतः निष्कर्षतः वक्तुं शक्यते-प्रौद्योगिकी न संस्कृतबालसाहित्यस्य प्रतिस्थापिका, अपि तु तस्य नवजीवनप्रदायिनी शक्तिः भवितुमर्हति। यदि प्रौद्योगिकी बालकेन्द्रिततया, संस्कृतभाषाशुद्ध्या, सांस्कृतिक-प्रामाणिकतया, नैतिकदृष्ट्या शैक्षिकोपयोगितया च सह प्रयुज्यते, तर्हि आधुनिकसंस्कृतबालसाहित्यं न केवलं भारतीयबालकानां, अपि तु वैश्विकबालसमुदायस्यापि ज्ञानमनोरञ्जनसंस्काराणां प्रभावो-त्पादकं माध्यमं भवितुं शक्नोति। वैज्ञानिके प्रौद्योगिकीयुगे मानवजीवनस्य प्रायः प्रत्येकस्मिन् क्षेत्रे परिवर्तनं द्रष्टुं शक्यते। शिक्षाक्षेत्रं, सञ्चारव्यवस्था, ज्ञानप्रसारः, मनोरञ्जनं साहित्य-सृजनञ्चापि प्रौद्योगिक्याः प्रभावात् निरन्तरं परिवर्तमानानि सन्ति। बालसाहित्यं समाजस्य भावीपीढ्याः मानसिक-बौद्धिक-नैतिक-सामाजिकविकासस्य महत्त्वपूर्णं साधनं विद्यते। अतः तस्य स्वरूपे प्रौद्योगिक्याः प्रभावः स्वाभाविकः एव। आधुनिकबालकस्य रुचिः, जिज्ञासा, ग्रहणशक्तिः जीवनशैली पूर्वापेक्षया परिवर्तिता अस्ति। अतः बालसाहित्यस्य प्रस्तुतीकरणे नूतनप्रौद्योगिकीमाध्यमानां समुचितः प्रयोगः समयस्य आवश्यकता वर्तते। अध्ययनेन ज्ञायते यत् ई-पुस्तकानि, श्रव्यपुस्तकानि, चित्रकथाः, दृश्य-श्रव्यसामग्री, एनीमेशन, चलदूरभाष-अनुप्रयोगाः, डिजिटल-क्रीडाः कृत्रिमबुद्धिम-त्ताधारितसाधनानि च बालसाहित्यस्य स्वरूपं अधिकं रोचकं, सुलभं, अन्तःक्रियात्मकं च कर्तुं शक्नुवन्ति। प्रौद्योगिक्याः माध्यमेन बालकः केवलं पाठस्य पाठको न भवति, अपि तु श्रोता, दर्शकः, सहभागी स्रष्टा चपि भवितुमर्हति। विशेषतः भाषाशिक्षणे उच्चारणम्, शब्दज्ञानम्, वाक्यरचना, श्रवणकौशलं पठनकौशलञ्च विकसितुं डिजिटलसाधनानि महत्त्वपूर्णां भूमिकां निर्वहन्ति। बालसाहित्यस्य प्रमुखं प्रयोजनं केवलं मनोरञ्जनं नास्ति। तेन बालके नैतिकमूल्यानि, सामाजिकचेतना, सहानुभूतिः, सहयोगभावना, प्रकृतिप्रेम, कर्तव्यबोधः सांस्कृतिकचेतना चापि विकसितुं शक्नुवन्ति। अतः प्रौद्योगिक्या निर्मितं बालसाहित्यं यदि केवलं मनोरञ्जनकेन्द्रितं भवति, तर्हि तस्य साहित्यिक-शैक्षिकप्रयोजनमपूर्णं भविष्यति। प्रौद्योगिकेः प्रयोगः बालमनोविज्ञानं, वयःस्तरं, भाषिकक्षमता सांस्कृतिकपरिवेशं चावलोक्य करणीयः।

सन्दर्भितग्रन्थसूची-

[1] काव्यप्रकाशस्य प्रथमोल्लासस्य 02,

[2] नारायणपण्डितकृतस्य हितोपदेशात्

[3] महाभारतस्य, उद्योगपर्वणः 44/16,

[4] काशीनाथ शर्मा (सम्पा), सुभाषितरत्नभाण्डागारम्, द्वितीयप्रकरणम्, श्लोकसंख्या 13, पृ. 45,

[5] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायः इति कथासङ्ग्रहे

[6] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायः इति कथासङ्ग्रहः, पृष्ठसंख्या-05,

[7] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य भविष्यत्कालस्य नगरे, पृष्ठ-संख्या-11,

[8] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य चौर्यम्, पृष्ठसंख्या-16,

[9] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य मातृत्वम्, पृष्ठसंख्या-21,

[10] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य आश्वासनम्, पृष्ठसंख्या-27,

[11] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य आत्महत्या, पृष्ठसंख्या-32,

[12] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य मानसापहरणम्, पृष्ठसंख्या-38,

[13] डॉ.हर्षदेवमाधवकृते संस्कृतेर्नवोऽध्यायस्य भयम्, पृष्ठसंख्या-42,